# क्रान्तिकारः विवेकानन्दः



**अध्यापकः** – एषः प्रसिद्धः महापुरुषः उत्तमः भाषणकर्ता च आसीत् । एषः कः?

**छात्रः** – अहं वदामि । सः बालगङ्गाधरतिलकः ।

**अध्यापकः** – न, तिलकः न । एषः सम्पूर्णभारतम् अटितवान् ।

**छात्रः** – सः शङ्कराचार्यः खलु?

**अध्यापकः** – किञ्चित् शृणोतु । एषः विदेशम् अपि अगच्छत् ।

**छात्रः** – विदेशम् अगच्छत्? प्रायः नेताजी ।

**अध्यापकः** – सः अपि न । संस्कृतमपि अपठत् ।

**छात्रः** – तर्हि महर्षिः अरविन्दः वा?

**अध्यापकः** – न । एषः कन्यकुमार्यां ध्यानम् अकरोत् ।

**छात्रः** – आम्! अहम् ज्ञातवान् । एषः स्वामिविवेकानन्दः खलु?

**अध्यापकः** – आम् । विवेकानन्दः एव । यदा विवेकानन्दः परिव्राजकः आसीत्, तदा सः सर्वत्र अगच्छत् । कदाचित् सः वनम् अगच्छत् । तदा केचन वानराः तम् अपश्यन् । यद्यपि सः धीरः, तथापि वानरान् दृष्ट्वा सः किञ्चित् भीतः अभवत् । अतः ततः शीघ्रम् अधावत् । वानराः अपि पृष्टतः अगच्छन् । तदा विवेकानन्दः हासध्वनिम् अशृणोत् । तत्र एकः संन्यासी अतिष्ठत् । सः विवेकानन्दम् अवदत् – "हे युवसंन्यासिन्, मा धाव! तेषां सम्मुखीकरणम् एव उत्तमम्" । एतत् श्रुत्वा विवेकानन्दः तत्र एव अतिष्ठत् । तदा वानराः अपि अतिष्ठन् । धैर्येण सः समीपम् अगच्छत् । तं दृष्ट्वा वानराः अधावन् ।

**अध्यापकः** – हे बालाः! भवन्तः अपि जीवने कष्टात् पलायनं मा कुर्वन्तु । भीताः मा भवन्तु । कष्टानां सम्मुखीकरणं भवतु ।



भाषणकर्ता – orator
अटितवान् – travelled
विदेशः – foreign country
परिव्राजकः – wandering monk
हासध्वनिम् – sound of laughter
पलायनम् – fleeing
सम्मुखीकरणम् – to face bravely